✧˖⋯°*❋ ❋*°⋯˖✧

# अच्युतस्याष्टकम् – अच्युतं केशवं - (Achyutashtakam Acyutam Keshavam)

in Gujarati

✧˖⋯°*❋ ❋*°⋯˖✧

# અચ્યુતાષ્ટકમ્

અચ્યુતં કેશવં રામનારાયણં
કૃષ્ણદામોદરં વાસુદેવં હરિમ્ ।
શ્રીધરં માધવં ગોપિકા વલ્લભં
જાનકીનાયકં રામચંદ્રં ભજે ॥ 1 ॥

અચ્યુતં કેશવં સત્યભામાધવં
માધવં શ્રીધરં રાધિકા રાધિતમ્ ।
ઇંદિરામંદિરં ચેતસા સુંદરં
દેવકીનંદનં નંદજં સંદધે ॥ 2 ॥

વિષ્ણવે જિષ્ણવે શંકને ચક્રિણે
રુક્મિણી રાગિણે જાનકી જાનયે ।
વલ્લવી વલ્લભાયાર્ચિતા યાત્મને
કંસ વિધ્વંસિને વંશિને તે નમઃ ॥ 3 ॥

કૃષ્ણ ગોવિંદ હે રામ નારાયણ
શ્રીપતે વાસુદેવાજિત શ્રીનિધે ।
અચ્યુતાનંત હે માધવાધોક્ષજ
દ્વારકાનાયક દ્રૌપદીરક્ષક ॥ 4 ॥

રાક્ષસ ક્ષોભિતઃ સીતયા શોભિતો
દંડકારણ્યભૂ પુણ્યતાકારણઃ ।
લક્ષ્મણોનાન્વિતો વાનરૈઃ સેવિતો

અગસ્ત્ય સંપૂજિતો રાઘવઃ પાતુ મામ્ ॥ 5 ॥

ધેનુકારિષ્ટકોઽનિષ્ટકૃદ્દ્વેષિણાં
કેશિહા કંસહૃદ્વંશિકાવાદકઃ ।
પૂતનાકોપકઃ સૂરજાખેલનો
બાલગોપાલકઃ પાતુ માં સર્વદા ॥ 6 ॥

વિદ્યુદુદ્યોતવત્પ્રસ્ફુરદ્વાસસં
પ્રાવૃડંભોદવત્પ્રોલ્લસદ્વિગ્રહમ્ ।
વન્યયા માલયા શોભિતોરઃસ્થલં
લોહિતાંઘ્રિદ્વયં વારિજાક્ષં ભજે ॥ 7॥

કુંચિતૈઃ કુંતલૈ ભ્રાજમાનાનનં
રત્નમૌળિં લસત્-કુંડલં ગંડયોઃ ।
હારકેયૂરકં કંકણ પ્રોજ્જ્વલં
કિંકિણી મંજુલં શ્યામલં તં ભજે ॥ 8 ॥

અચ્યુતસ્યાષ્ટકં યઃ પઠેદિષ્ટદં
પ્રેમતઃ પ્રત્યહં પૂરુષઃ સસ્પૃહમ્ ।
વૃત્તતઃ સુંદરં કર્તૃ વિશ્વંભરઃ
તસ્ય વશ્યો હરિ ર્જાયતે સત્વરમ્ ॥

**॥ ઇતિ શ્રીશંકરાચાર્યવિરચિતમચ્યુતાષ્ટકં સંપૂર્ણમ્ ॥**

✧˖·····°*❋ ❋*°·····˖✧